"हा:स्त्रीणां दुरुहृदयामादाय विजने वने ।
परित्यजाशु नैतत्ते विचार्य्यं वचनं मम ॥")

विचालं, त्रि, अभ्यन्तरम् । अन्तरालम् । इति हेमचन्द्रः ॥ (पुं, संख्यान्तरापादनम् । यथा, पाणिनौ । ५ । ३ । ४३ । "अधिकरणे विचाले च ॥")

विचिः, पुं स्त्री, (विवेक्ति जलानि पृथगिव करोति । विच + "इगुपधात् कित् ।" उणा० ४ । ११६ । इन् । स च कित् ।) वीची । तरङ्गः । इत्यमरटीकायां भरतः ॥

विचिकित्सा, स्त्री, (विचिकित्सनमिति । वि + कित + सन् + अः । टाप् ।) सन्देहः । इत्यमरः ॥ (यथा, भागवते । ३ । ६ । ३६ ।
"तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽवहिः ।
नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥")

विचित्रं, क्ली, (विशेषेण चित्रम् ।) कर्व्वुरवर्णः । इति शब्दरत्नावली ॥ तद्वति, त्रि । (यथा, महाभारते । ३ । ५४ । १० ।
"विचित्रमाल्याभरणैर्व्वलैर्दृप्तैः स्वलङ्कृतैः ॥")
आश्चर्य्यम् । यथा,—
"विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥"
इति देवीमाहात्म्यम् ॥
(यथा च, उपदेशशतके । ३३ ।
"दुहिता विदेहभर्त्तुर्द्दाशरथेर्भामिनी सीता ।
वधमाप राक्षसीनां विधेर्व्विचित्रा गतिर्ब्बोध्या ॥"
पुं, रौच्यमनुपुत्त्रः । यथा, मार्कण्डेये । ९४ । ३१ ।
"चित्रसेनो विचित्रश्च नयतिर्निर्भयो दृढः ।
सुनेत्रः क्षत्रबुद्धिश्च सुव्रतश्चैव तत्सुताः ॥"
अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७२२ ।
"विचित्रं तद्विरुद्धस्य कृतिरिष्टफलाय चेत् ।
यथा,—
प्रणमत्युन्नतिहेतोर्जीवनहेतोर्व्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढ़ः सेवकादन्यः ॥")

विचित्रकः, पुं, (विविधानि चित्राणि यस्मिन् । बहुव्रीहौ कन् ।) भूर्ज्जवृक्षः । इति राजनिर्घण्टः ॥

विचित्रदेहः, पुं, (विचित्रो देहो यस्य सः ।) मेघः । इति शब्दचन्द्रिका ॥ आश्चर्य्यशरीरे नानावर्णदेहे च, त्रि ॥

विचित्रवीर्य्यः, पुं, (विचित्राणि वीर्य्याणि यस्य सः ।) चन्द्रवंशीयराजविशेषः । स च शान्तनोर्दाशकन्यायां जातः । तस्य क्षेत्रे सत्यवत्याज्ञया व्यासो धृतराष्ट्रं पाण्डुञ्च जनयामास । इति श्रीभागवतमतम् ॥

विचित्रवीर्य्यसूः, स्त्री, (विचित्रवीर्य्यस्य सूः प्रसजननी ।) सत्यवती । इति शब्दरत्नावली ॥

विचित्रा, स्त्री, (विचित्रं नानाविधवर्णमस्त्यस्या इति । अर्श आदित्वादच् । स्त्रियां टाप् ।) मृगेर्व्वारुः । इति राजनिर्घण्टः ॥

विचित्राङ्गः, त्रि, (विचित्राणि अङ्गानि यस्य ।) मयूरः । इति शब्दरत्नावली ॥ व्याघ्रः । इति शब्दचन्द्रिका ॥ आश्चर्य्यशरीरे, त्रि ॥

विचित्रितः, त्रि, (विचित्रमस्य जातमिति । विचित्र + इतच् ।) नानावर्णयुक्तः । यथा,—
"आसनं सर्व्वशोभाढ्यं सद्रत्नमणिनिर्म्मितम् ।
विचित्रितञ्च चित्रेण रम्यतां शोभनं हरे ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥

विची, स्त्री, (विचि + कृदिकारादिति ङीष् ।) तरङ्गः । इति द्विरूपकोषः ॥

विचेताः, [स्] त्रि, (विगतं विरुद्धं वा चेतो यस्य ।) विगतचित्तः । (यथा, भागवते । ६ । ११ । ६ ।
"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥")
विरुद्धचित्तः । दुष्टचित्तः ॥ तत्पर्य्यायः । दुर्म्मनाः २ अन्तर्म्मनाः ३ विमनाः ४ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ३ । ४६ । १७ ।
"ये चास्य सचिवा मन्दाः कर्णसौबलकादयः ।
ते तस्य भूयसो दोषान् वर्द्धयन्ति विचेतसः ॥" * ॥
विशिष्टं चेतो यस्मादिति । विशिष्टज्ञानहेतुभूतः । यथा, ऋग्वेदे । १ । ८३ । १ ।
"तमित् पृणक्षि वसुना भवीयसा
सिन्धुमापो यथाभितो विचेतसः ॥"
"विचेतसः विशिष्टज्ञानहेतुभूता आपो यथा अभितः सर्व्वासु दिक्षु सिन्धुं समुद्रं पूरयन्ति तद्वत् ।" इति तद्भाष्ये सायणः ॥ * ॥ विशिष्टं चेतो यस्येति । विशिष्टज्ञानः । यथा, ऋग्वेदे । १ । ४५ । २ ।
"श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ॥"
"हे अग्ने विचेतसो विशिष्टप्रज्ञाना देवाः ।"
इति तद्भाष्ये सायणः ॥)

विचेष्टितः, त्रि, (विशेषेण चेष्टितं गतिर्यस्य ।) विगतः । (विशेषेण चेष्टितः ।) ईहितः । इति मेदिन्यां चेष्टितशब्दार्थदर्शनात् ॥ (विगतं चेष्टितमस्येति वाक्ये चेष्टाशून्यश्च ॥ * ॥ क्ली, वि + चेष्ट + भावे क्तः । विशेषेण चेष्टा । यथा, भागवते । १ । ५ । १३ ।
"उरुक्रमस्याखिलबन्धमुक्तये
समाधिनानुस्मर तद्विचेष्टितम् ॥")

विच्छ, क त्विषि । इति कविकल्पद्रुमः । (चुरा०-पर०-अक०-सेट् ।) क, विच्छयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

विच्छ, श गतौ । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) विच्छायति विच्छायते आयन्तत्वादुभयमिति वोपदेवः । पक्षे विच्छति । श, विच्छती विच्छन्ती । इति दुर्गादासः ॥

विच्छन्दकः, पुं, ईश्वरसद्मप्रभेदः । इत्यमरः ॥ विशिष्टश्छन्दोऽभिप्रायोऽत्र विच्छन्दकः । किंवा विशिष्टैश्छन्दैर्निर्म्मितो 'विच्छन्दकः' ष्ठचे कादिति कः । एवं लक्षणमुपन्यस्तं साक्षात् । यथा,—
"उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञकम् ॥"
इति भरतः ॥

विच्छर्दकः, पुं, विच्छन्दकः । इत्यमरटीकायां रायमुकुटः ॥

विच्छायं, क्ली, पक्षिणां छाया । इत्यमरः ॥ समासे बहुत्वात् परा च्छाया क्लीबे स्यात् । सा चेत् बहूनां सम्बन्धिनी स्यात् । उदाहरति । वीनां पक्षिणां छाया विच्छायम् । इत्यमरटीकायां भरतः ॥ (यत्तु भागवते । १० । १२ । ८ ।
"विच्छायाभिः प्रधावन्तो गच्छन्तः साधु हंसकैः ॥"
इति दृश्यते तत्तु वेः पक्षिणश्छाया विच्छाया तत एकशेषद्वन्द्वे कृते विच्छायाश्चाभिर्विच्छायाभिरिति सिद्धं स्यादिति सुधीभिर्विभाव्यम् ॥ * ॥ विगता छाया यस्य ।) छायारहिते, त्रि ॥ (विगता छाया कान्तिर्यस्य । कान्तिरहिते च त्रि । यथा, भागवते । १ । १४ । २४ ।
"विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ।
पृच्छति स्म सुहृन्मध्ये संलक्ष्यारदेरितम् ॥")

विच्छायः, पुं, (विशिष्टा छाया कान्तिर्यस्य ।) मणिः ॥ इति याम्यवर्गे छायाशब्दटीकायां भरतः ॥

विच्छित्तिः, स्त्री, (वि + छिद् + क्तिन् ।) अङ्गरागः । विच्छेदः ॥ (यथा, कामन्दकीयनीतिसारे । १४ । ४४ ।
"लोभो धर्म्मक्रियालोपः कर्म्मणामप्रवर्त्तनम् ।
सत्समागमविच्छित्तिरसद्भिः सह वर्त्तनम् ॥")
हारभेदः । इति मेदिनी । ते, १८५ ॥ छेदः । विनाशः । इति त्रिकाण्डशेषः ॥ (यथा, वृहत्संहितायाम् । १२ । ६ ।
"दिनकररथमार्गविच्छित्तयेऽभ्युद्यतं चलशृङ्गम् ॥")
अङ्गहारः । गेहावधिः । इति हेमचन्द्रः ॥ (वैचित्र्यम् । यथा, साहित्यदर्पणे । १० । ७११ ।
"अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात् ॥"
स्त्रीणां स्वाभाविकालङ्कारविशेषः ।) यथा,—
"आकल्पकल्पनाल्पापि विच्छित्तिः कान्तिपोषकृत् ॥"
इत्युज्ज्वलनीलमणिः ॥
(यथा च साहित्यदर्पणे । ३ । १३८ ।
"स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत् ॥")

विच्छिन्नः, त्रि, (वि + छिद् + क्तः ।) समालब्धः । विभक्तः । इति मेदिनी । ने, १३४ ॥ (यथा, शाकुन्तले १ अङ्के ।
"यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्द्धे विच्छिन्नं भवति कृतसन्धानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे पार्श्वे किञ्चित् क्षणमपि न दूरे रथजवात् ॥")
कुटिलः । इति हेमचन्द्रः ॥